ISSN 2249 - 2313

षाण्मासिकी संस्कृतशोधपत्रिका

Half Yearly Sanskrit Research Journal

Vol. VIII Apr,2015 - Sept, 2015 No. 1

वर्षम् – ८ अप्रेल – सितम्बर, २०१५ अङ्कः – प्रथमः

# प्राचीसुधा

## PRACI SUDHA

'प्राचीसुधा' सुललिता बहुशास्त्रतत्त्व–
पूर्णा जगज्जनहिताऽखिललोकमान्या ।
आध्यात्मिकीं सुखकथां परिवेषयन्ती
संराजतां निरभिमानबुधेषु नित्यम् ॥

सम्पादकः सञ्चालकश्च

डॉ॰ विश्वनाथस्वाईँ

पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्, पुरी, ओडिशा

PURUSOTTAM RESEARCH ACADEMY OF INDOLOGY

PURI, ODISHA

Scanned with CamScanner

ISSN 2249 – 231

सप्तमवर्षम् प्रथमसङ्ख्य

# विषयसूची

| पृष्ठाङ्काः | विषयाः | लेखकाः |
|---|---|---|
| ३. | सम्पादकीयम् | डॉ.विश्वनाथस्वाईं |
| ५. | श्रीभागवती वार्ता | प्रो.हरेकृष्णमहापात्रः |
| ९. | असत्कार्यवादस्थापनम् | डॉ.विष्णुपदमहापात्रः |
| ११. | भ्रष्टाचाराणां निराकरणे संस्कृतशिक्षा | डॉ.निर्मलापाणिग्राही |
| १२. | मृच्छकटिके रोहसेनस्य पात्रालेखनम् | डॉ.डायालाल एम.मोकरियाँ |
| १४. | भारतीयदर्शनेषु निम्बार्कदर्शनस्य वैशिष्ट्यम् | डॉ.वसन्ता एम. |
| १७. | वेदमन्त्रेषु अभिव्यज्यमानानामेषणानां विमर्शः | डॉ.नरेन्द्रकुमारः पण्ड्या |
| २४. | शाब्दिकमते पदपदार्थयोः मीमांसा | राजेश्री डॉ.महन्त रामसुन्दर दास |
| २७. | शास्त्रत्रयी | डॉ.मेधाकुमारी |
| ३०. | वन्दे श्रीमज्जगन्नाथम् | डॉ.प्रभुनाथद्विवेदी |
| ३४. | वेदस्तुतौभेदाभेदोपासना | आचार्यः ज्ञानेन्द्रत्रिपाठी |
| ३७. | स्कन्दब्रह्मपुराणयोस्तीर्थभेदविषये विरोधस्य परिहारः | डॉ.भारतेन्दुपाण्डेयः |
| 80. | DECLARATION | |

Scanned with CamScanner

# वेदमन्त्रेषु अभिव्यज्यमानानामेषणानां विमर्शः

डॉ.नरेन्द्रकुमारः पण्ड्या

(सारांशः – अस्मिन् शोधपत्रे वेदमन्त्रेषु निगदितानां मनुष्यमनसाम् एषणानां वर्णनं निहितमस्ति । मनुष्यमनस्सु जायमाना एषणानां वर्णनमत्र शुक्लयजुर्वेदीय-रुद्राष्टाध्याय्याः परिप्रेक्ष्ये कृतमस्ति । पौरुषेयधर्माणां पौरुषेयकर्मणाञ्च निरूपणं तु अपौरुषेयेष्वस्तीति तु विदितचरमेव किन्तु पौरुषेयी-एषणानां महन्निरूपणं माम् प्रेरितवत् एतस्मै शोधपत्राय ।)

य: कश्चित् कस्यचिद् धर्मो मनुना परिकीर्तितः ।
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ।।

इति मनूक्तिमनुसृत्य वेदस्य सर्वज्ञानमयत्वमभिधीयते । मानवीयाः सर्वे धर्माः वेदे अभिहिताः सन्ति । सर्वधर्मास्तत्र निरूपिताश्चेत् मनोधर्माः अपि तत्र अवश्यं निरूपिताः भवेयुः इति सिद्ध्यति । तत्र तावत् वेदमन्त्रेषु कीदृशाः मनोधर्माः मनोरथाः मनःकामनाः अभिलाषाः एषणाः रागाः कामाः इच्छाः अभिव्यक्ताः भवन्ति तदेतत् शुक्लयजुर्वेदीयरुद्राष्टाध्यायीमन्त्राणां परिप्रेक्ष्येऽत्र प्रस्तुतिविषयः अस्य लेखस्य । प्रारंभ प्राणिनां प्रवृत्तयो या अवलोक्यन्ते तत्र सर्वेषां स्वसुखार्थाः प्रवृत्तयो दृग्गोचरायन्ते । अत इदमभिधीयते यत् –

'सुखार्थाः सर्वजन्तूनां मताः सर्वाः प्रवृत्तयः ।
सुचं न च विना धर्मात् तस्माद् धर्मं समाश्रयेत् ।।'

सर्वप्रवृत्तीनां सुखार्थत्वात्, सुखस्य धर्माश्रितत्वाच्च धर्मः समनुष्ठेयो भवति । सुखं सर्वेषामिच्छाविषयो भवति । दुःखं च सर्वेषां द्वेषविषयो भवति । अत एव पतञ्जलयोगसूत्रे 'सुखानुशयी रागः दुःखानुशयी द्वेषः' कथितः । तर्कसङ्ग्रहादिग्रन्थेषु सुखदुःखलक्षणमित्थमभिहितं यत् 'अनुकूलतया वेदनीयं सुखम्, प्रतिकूलतया वेदनीयं दुःखम्' इति । प्राणिनां सुखमिष्टम् दुःखमनिष्टं द्विष्टम्, यदसुखमदुःखं तत् अनिष्टम् । 'सुखं मे भूयात् दुःखं मे मा भूत्' इति सर्वेषां मूलभूतकामना वर्तते । अत एव एतदभिलाष-परिपूर्त्यै सुखविषये प्रवृत्तिः दुःखविषये निवृत्तिश्च परिलक्ष्यते । आत्यन्तिकी सुखप्राप्तिः आत्यन्तिकी दुःखनिवृत्तिः प्राणिभिः अभ्यर्थ्यते ।

Scanned with CamScanner

न्यायशास्त्रे तु एकविंशतिसङ्ख्याकदुःखानाम् आत्यन्तिकी निवृत्तिः मोक्षः इति अभिहितमस्ति । 'तदत्यन्तविमोक्षोऽपवर्गः' इति गौतमीयं न्यायसूत्रम् अस्ति । अनेन इदं प्रतीयते यत् मनुष्यजीवने यः यः सुखविषयः तस्य एषणा सामान्यतः भवति यश्च दुःखविषयः तस्य निवृत्तिविषयिण्यः इच्छाः भवन्ति । वैदिकमन्त्रेषु यन्मननं या मतिः या मान्यता विलोक्यते तत्र क्वचित् शब्दतः क्वचिदर्थतः तात्पर्यतः विविधाः एषणा अभिव्यज्यन्ते । तत्र काचित् शब्दतः अभिलाषाः यथा – 'तन्मे मनः शिवसङ्कल्पमस्तु', या ते रुद्रशिवा तनूरघोराऽपापकाशिनी तया नस्तन्वा शान्तमया गिरिशन्ताभिचाकशीहि ।। (२/१६) 'शिवो नः सुमना भव' (१३/१६) । इत्यादि मन्त्रवाक्येषु । अत्र हि शब्दतः अभिलाषाः कथ्यन्ते । क्वचिदर्थतः तात्पर्यविषयीभूताः इच्छाः प्रतीयन्ते यथा रुद्राष्टाध्यायीप्रथमाध्याये प्रथममन्त्रे (यश्च शुक्लयजुर्वेदे त्रयोविंशाध्याये एकोनविंशोमन्त्रः) । 'तत्र गणपतिं हवामहे, प्रियपतिं हवामहे, निधिपतिं हवामहे' इति त्रिषु वाक्येषु आह्वानमस्ति । यत्र यद्यपि शब्दतः केवलं आह्वानक्रिया अवलोक्यते परन्तु आह्वानक्रियाकर्मणः अभीष्टतायामेव सा सम्भवति अतः अत्र गणपतिः अभीप्साविषयो भवति । तत्रापि सूक्ष्मेक्षिकायां गणोऽपि अभीप्साविषयः भवति । याः क्रियाः कर्त्रा क्रियन्ते तत्र इच्छा अन्तर्निहिता भवति । अत एव कर्तृत्वलक्षणाभिधाने उक्तं यत् 'उपादानापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं कर्तृत्वम्' इति कर्तरि कर्तुमिच्छा = चिकीर्षा स्यात्तदेव तस्य कर्तृत्वं सम्पद्यते एवं च क्रियायां कर्मत्वमपि तस्य भवति यत् कर्तुः ईप्सिततमं स्यात् 'कर्तुरीप्सिततमं कर्म' कर्म ईप्सिततमं भवति । अन्यान्यपि करणादिकारकाणि क्रियासाधकत्वादितया कर्तुः अभीप्साविषयाणि भवन्ति । एवमत्र गणपतिः प्रियपतिः निधिपतिः इच्छाविषयाः भवन्ति । वयं गणं कामयामहे प्रियं कामयामहे निधिं कामयामहे इत्यादयः अर्थाः अपि फलिताः भवन्ति एव । यथा वा –

सहस्तोमाः सहच्छन्दसऽ आवृतः सहप्रमा ऋषयः सप्तदैव्याः ।
पूर्वेषां पन्थामनुदृश्य धीरा अन्वालेभिरे रत्थ्यो न रश्मीन् ।। (४/४९/३)

अत्र ऋषयः सहप्रमाः सन्तु, सहस्तोमाः सन्तु, सहच्छन्दसः सन्तु इत्यादयः अर्थः तात्पर्यतः अनुभूयन्ते । ऋषयः पूर्वेषां पन्थानमनुदृश्य धीराः प्रवर्तन्ते इति वाक्यात् वयमपि पूर्वर्षीणां मार्गानुगामिनो भवेम इति भवत्यभिप्रायः । 'येन ते पितरो याता ये याताः पितामहाः । तेन यायाः सतां मार्गं यत्र गच्छन्न रिष्यसि ।।' इत्युक्त्यनुसं पूर्वानुसारित्वं प्रशस्तीकृतम् । एवमेव विविधेषु मन्त्रेषु अर्थतोऽपि काश्चन कामना सङ्कल्पनाः समनुभूयन्ते ।

Scanned with CamScanner

वयमत्र प्रायेण शब्दतः उक्तानम् एषणानां विमर्शं करिष्यामः । तत्र रुद्राष्टाध्याय्यां प्रथमाध्याये प्रधानतया या कामना प्रकटीभवति सा कामना-भावना-अभीप्सा अस्ति । 'तन्मे मनः शिवसङ्कल्पमस्तु', 'बृहत्युष्णिहा ककुप्सूचिभिः शम्यन्तु त्वा', 'विच्छन्दा याश्च सच्छन्दा सूचिभिः शम्यन्तु त्वा' ।

प्रथमाध्याये प्रधानतया अभिव्यज्यमानः रागः मनसि शिवसङ्कल्पाः सन्तु इति अस्ति । जीवनं सत्यं शिवं सुन्दरं शिवसङ्कल्पैः संजायते । सत्यसङ्कल्पाः शिवसङ्कल्पः सुन्दरसङ्कल्पाः मनस्सु जनानां-सुजनानां जायन्ताम् इति एका शुभकामना भवति । शिवसङ्कल्पसूक्ते मनसः स्वरूपनिदर्शनं कृत्वा तदीयमनेकविधं सामर्थ्यमुद्द्योतितं दृश्यते । इदं मनो दूरङ्गमम्, अपूर्वं, प्रज्ञानं, चेतः, धृतिः, ज्योतिः अस्ति । 'यस्मान्न ऋते किञ्चन कर्म्म क्रियते' मनसा विना न किमपि कर्म संपद्यते । अत एव मनसः कर्मेन्द्रियत्वमपि दार्शनिकग्रन्थेषु स्वीक्रियते । पञ्चज्ञानेन्द्रियसाध्य-ज्ञानानुभवमरणेऽपि मनसः कारणता स्वीकृता अस्ति । तस्मात् तत् ज्ञानेन्द्रियमपि कथ्यते । इदं मनः यत्र सर्वं ज्ञानम् ओतं प्रोतम् अस्ति । इदं मनः मनुष्याणां सारथिसदृशमस्ति । हृदि प्रतिष्ठम् अजिरं जविष्ठं मनः । एतस्य शिवसङ्कल्पतायां जीवनं कल्याणमयं स्वलक्ष्य-गन्तव्यप्रापकं, कर्त्तव्यकर्मपरायणं, सर्वकल्याणसुख-समृद्धिशान्तिसंपादकम्, अभयमशोकमरोगं सयोगं प्रसन्नं प्रकृष्टं प्रगल्भं विवेकमयं सद्विचाराचारापूतं व्यापकं विशालं विमलं सकलमविकलं सद्गुणमन्दिरं सत्यं शिवं सुन्दरं स्यात् इत्यत्र नास्ति मनागपि संशयः । रुद्राष्टाध्याय्यां तृतीयेऽध्याये 'गोत्रभिदं गोविदम्...' इति षष्ठे मन्त्रे ३८/१७ यो हि इन्द्रः पराक्रमशीलः वर्तते तमनुसृत्य सजाता अपि अनुवीरा भवन्तु अनुसंरम्भं कुर्वन्तु इति । सप्तमे मन्त्रे शतमन्युः दुश्च्यवचनः पृतनाषाड् अयुध्यः इन्द्रः प्रयुत्सु युद्धेषु अस्माकं सेनाः अवतु इति स्वसेनारक्षणस्य कामना क्रियते । 'महामनसां भुवनच्यवानाङ्घोषो देवानां जयतामुदस्थात्' इति मन्त्रे विजयोत्सवघोषणायां विजयकामना अभिव्यज्यते । एकादशे मन्त्रे ४३/१७ अस्माकं या इषवस्ता जयन्तु, अस्माकं वीराः उत्तरे भवन्तु, अस्मान् उ देवा हवेषु अवत । 'अमीषाश्चित्तम्प्रति ...' इत्यादिमन्त्रे अमित्राणाम् अन्धकारे तिरास्ताम् इति काम्यते । ४३/१७ इन्द्रो वः शर्म यच्छतु एवं उग्रा वः बाहवः सन्तु इति वाक्ययोः शर्मकामना बाहुषु च उग्रताकामना निरूप्यते । पञ्चदशे मन्त्रे शत्रुसेना अन्धकारग्रस्ता येन तद्वीराः परस्परम् अन्योऽन्यं न जानन्तु । (टियरगेससदृशमिदम्) यत्र बाणानां वृष्टिः जायते । इन्द्रो बृहस्पतिः अदितिः शर्म यच्छतु, मर्माणि ते वर्मणा छादयामि, सोमः राजा त्वाम् अमृतेन अनुवस्ताम्, वरुणः उरोः वरीयः कृणोतु देवा

Scanned with CamScanner

जयन्तं त्वाम् अनु मदन्ताम् इत्यादिवाक्येषु शर्मकामना, शरीरसंरक्षणकामना, अमृतानुवासकामना, उरूवरीयस्त्वकामना, अनुमदकामना च अभिव्यक्ता भवन्ति । चतुर्थाध्याये सूर्यद्वारा अस्माकं दर्शनशक्तिः प्रवृद्धा स्यात् । (४१/३३) मन्त्रे सूर्यतेजसः ग्रहणं कर्तव्यमिति कामना अभिव्यज्यते ।

पञ्चमाध्याये गिरिशाय प्रार्थ्यते शिवातनुप्रकाशनाय (२/१६) शिवस्य बाणाः शिवङ्कराः भवन्तु, हिंसकाः मा भवन्तु (३/१६) सर्वमिदं जगत् अयक्ष्मं सुमनश्च भवतु (४/१६) सर्वेषाम् अहीनां जम्भनं (घातः) यातुधानीनां परासनं निःसनम् (५/१६) हे भगवन् तव हस्ते या इषवः ताः परावप अस्मत्तः दूरतः स्थापय (३/३५) या ते हेतिः धनुश्च ताभ्याम् अस्मद्रक्षणं कुरुष्व (११/१६) हे सहस्राक्ष हे शतेषुधे त्वं नः कृते शिवः सुमनाः भव (१३/१६) ।

'मानो महान्तमुत मानो अर्भकम्' इत्यादिषु शिवात् भगवतः सकुटुम्बस्य महतां बालकानां मातापितॄणां शरीराणां च रक्षा काम्यते (१५/१६) स्तोकानां तनयानां गवामश्वानां वीराणां निजायुषश्च हिंसा मा भवतु भगवतः शङ्करात् इति काम्यते (१६/१६) । 'अवस्थिरा मघवद्भ्यस्तनुष्वमीढ्वस्तोकाय तनयाय मृड' (१०/१६) इत्यत्र आयुरारोग्यसुखसमृद्धिः परिवारे शरीरे बालगोपालेषु काम्यते ।

'मीढुष्टम शिवतम भगवन् शिवो नः भव सुमनाः न भव' इति काम्यते (५१/१६) । विलोहित नमस्ते अस्तु भगवः यास्ते सहस्रं हेतयोऽन्यमस्मान्निवपन्तु ताः (५२/१६) । 'सहस्राणि सहस्रशो बाह्वोस्तव हेतयः । तासामीशानो भगवः पराचीना मुखा कृधि' (५३/१६) । अनयोः मन्त्रयोः स्वरक्षणस्य कामना अभिव्यज्यते । भगवतः रुद्रस्य सकाशात् स्वस्य उपरि रुद्रः बाणान् न पातयेत्, बाणानां मुखानि पराचीनानि करोतु इति प्रार्थ्यते । भगवतो रुद्रस्य शिवस्य धनुषां सहस्रशो योनेः बाणक्षेपणशक्तिर्वर्णिता । पञ्चमाध्यायस्य अन्तिमेषु त्रिषु मन्त्रेषु शिवस्य रुद्रस्य भगवः दिवि वर्षम् इषवः, अन्तरिक्षे वात इषवः, पृथिव्याम् अन्नम् इषवः इति त्रिविधबाणानां निरूपणं कृत्वा ते बाणाः अस्मान् रक्षन्तु अस्मान् मृडयन्तु अथ च यं वयं द्विष्मः यश्च अस्मान् द्वेष्टि तेषां जम्भनार्थं वयं बाणान् दद्ध्मः । अत्र स्वस्य रक्षा शत्रूणां च वधः अपेक्षितः दृश्यते ।

रुद्राष्टाध्यायीषष्ठाध्याये 'अवरुद्र....', 'भेषजमसि भेषजङ्गवे....', 'एतत्ते रुद्र.....' इति मन्त्रेषु रक्षणाय सुखप्राप्तये प्रार्थना दृश्यते । 'त्र्यम्बकं यजामहे...' इति मन्त्रस्तु सुप्रसिद्धः । अत्र बन्धनान्मोक्षस्य अमृतत्वस्य अभिलिप्सा वर्तते । 'त्र्यायुषञ्जमदग्नेः.....' इति मन्त्रे त्र्यायुषस्य प्रेप्सा कथिता । 'शिवो नामासि...' इति

Scanned with CamScanner

मन्त्रे स्वस्य अहिंसा, आयु:, अन्नाद्यं, प्रजननं रायस्पोष: सुप्रजस्त्वं सुवीर्यं च अभीप्साविषया: सन्ति ।

सप्तमाध्याये 'उग्रं लोहितेन....' इत्यादिषु मन्त्रेषु लोहितसौव्रत्यदौर्व्रत्य-प्रक्रीडाबलप्रमोदादिसाधनापेक्षा कथिता ।

अष्टमाध्याये तु वाज-प्रसव-पयति-प्रसिति-अधीति-क्रतु-स्वर-श्लोक-श्रव-श्रुति-ज्योति:-स्व:-प्राण-अपान-व्यान-असु-चित्त-अधीत-वाक्-मन:-चक्षु:-श्रोत्र-दक्ष-बल-ओज:-सह:-आत्मा-तनु-शर्म्म-वर्म्म-अङ्ग-अस्थि-परु:-शरीर-आयु:-जरा-ज्यैष्ठ्य-आधिपत्य-मन्यु-भाम-इम-अम्भ:-जेम-महिम-वरिम-प्रथिम-वर्षिम-द्राघिम-वृद्धि-सत्य-श्रद्धा-जगत्-धन-विश्व-मह-क्रीडा-मोद-जात-जनिष्यमाण-सूक्त-सुकृत-ऋत-अमृत-अयक्ष्म-जीवातु-दीर्घायु:-अनमित्र-अभय-सुख-शयन-सूषा-सुदिन-यन्तृ-धर्तृ-क्षेम-धृति-विश्वमह:-संविद्-ज्ञात्र-सू-प्रसू-सीर-लय-शं-मय-प्रिय-अनुकाम-काम-सौमनस-भग-द्रविण-भद्र-श्रेय:-वसीय-यश:-ऊर्जम्-सूनृता-पय:-रस-घृत-मधु-सग्धि-सपीति-कृषि-वृष्टि-जैत्र-औद्भिद्य-रयि-राय-पुष्ट-पुष्टि-विभु-प्रभु-पूर्ण-पूर्णतर-कुयव-अक्षित-अन्न-क्षुध्-वित्त-वेद्य-भूत-भविष्यत्-सुग-सुपथ्य-ऋद्ध-ऋद्धि-क्लृप्त-क्लृपित-मति-सुमति-व्रीहि-यव-माष-तिल-मुद्ग-खल्व.प्रियङ्गु-अणु-श्यामाक-नीवार-गोधूम-मसूर-अश्मा-मृत्तिका-गिरि-पर्वत-सिकता-वनस्पति-हिरण्य-अय:-श्याम-लोह-सीस-त्रपु-अग्नि-अप्-वीरुध्-ओषधि-कृष्टपच्य-ग्राम्यपशु-आरण्यपशु-वित्त-वित्ति-भूत-भूति-वसु-वसति-कर्म-शक्ति-अर्थ-एम-इत्या-गति-इन्द्रेण सह अग्निसोमसवितृसरस्वतीपूषबृहस्पतिमित्रवरुणधातृत्वष्टृमरुद्विश्वदेव-पृथिवी-अन्तरीक्ष-द्यो-समा-नक्षत्रदिक्देवतानाम् आनुकूल्यसम्पादन-अंशुरश्मि-अदाभ्य-अधिपति-उपांशु-अन्तर्याम-ऐन्द्रवायव-मैत्रावरुण-आश्विन-प्रतिप्रस्थान-शुक्र-मन्थी-आग्रयण-वैश्वदेव-ध्रुव-वैश्वानर-ऐन्द्राग्र-महावैश्वदेव-मरुत्वतीय-सावित्र-सारस्वत-पात्नीवत-हारियोजन-स्रुच्-चमस-वायव्य-द्रोणकलश-ग्राव-अधिषवण-पूतभृत्-आधवनीय-वेदि-बर्हि:-अवभृथ-स्वगाकार-अग्नि-धर्म-अर्क-सूर्य-प्राण-अश्वमेध-पृथिवी-अदिति-दिति-द्यो-अङ्गुलि-दिश्-व्रत-ऋतु-तप:-संवत्सर-अहोरात्र उर्व्वष्ठीवेहत्रथन्तर-एकादिद्व्यधिकयोगवतीसंख्या-चतस्रादि-चतुरधिकयोगवतीसंख्या-त्र्यवि-त्र्यवी-दित्यवाह्-दित्यौही-पञ्चावि-त्रिवत्स-त्रिवत्सा-तुर्य्यवाह्-तुर्यौही-पष्ठवाह्-पाष्ठौही-उक्षा-वशा-ऋषभ-वेहत्-अनड्वाह-धेनु-ऊर्ज-वृष्टि-प्रजाधिपत्य-आयु:-प्राण-चक्षु:-श्रोत्र-वाच्-मन:-आत्मा-ब्रह्म-

Scanned with CamScanner

ज्योतिः-स्वः-पृष्ठ-यज्ञ-स्तोम-यजुः-ऋच्-साम-बृहद्रथन्तरसाम इमे पदार्थाः कल्पन्ताम् इति एतेषां सर्वेषां बहुविधानां पदार्थानां कामना दृश्यते ।

शान्त्यध्याये 'ऋचं वाचम् ...' इत्यादिमन्त्रेषु ऋग्यजुःसामप्रपत्तिः तद्रूपेण वाङ्मनःप्राणानां प्रपत्तिः प्रार्थ्यते । वागोजः सहौजो, प्राणः, अपानः, चक्षुषः, हृदयस्य मनसः अच्छिद्रता, भुवनपतिः, सुखदायकः शान्तिदायकः (शं) अस्तु । सवितुर्देवस्य वरेण्यभर्गस्य ध्यानं, बुद्धिप्रेरणा, (धीप्रचोदना), इन्द्रस्य प्रसन्नता, रक्षणकामना, आनन्दप्रमोदाभरणम्, द्विपदां चतुष्पदां शम्, मित्र शम्, वरुणः शम्, अर्यमा शम्, इन्द्र शम्, बृहस्पतिः शम्, वातः शं पवताम्, सूर्यः शं तपतु, कनिक्रदत् पर्जन्यः देवः शं अभिवर्षतु अहानि शं भवन्तु, रात्रीः शं प्रति धीयताम्, इन्द्राग्नी अवोभिः शं भवताम्, इन्द्रावरुणा रातहव्या नः शं भवतां देवीः आपः अभीष्टये पीतेय नः शं भवन्तु, शंय्योः आरोग्याभयाय आपः अभिस्रवन्तु नः, हे पृथिवि ! त्वं नः स्योना भव अनृक्षरा भव, निवेशिनी भव, सप्रथाः भव, नः शर्म यच्छ, शिवतमानामपां प्राप्तिः, द्यौः शान्तिः, अन्तरिक्षं शान्तिः, पृथिवी-शान्तिः इत्यादिशान्तयः, अहिंसा, मित्रदृष्टिः मित्रचक्षुः, दिव्यतामयं जीवनम्, 'अन्याँस्ते अस्मत्तपन्तु हेतयः ....' इति मन्त्रे स्वस्य शिवम् अन्यस्मै तापः, अभयदानम् अभयप्राप्तिः, अभयप्रार्थना प्रजाभ्यः शं, पशुभ्यः शं, सुमित्रिया आपः भवन्तु, सुमित्रिया ओषधयः भवन्तु, आपः ओषधयश्च तस्मै दुमित्रिया भवन्तु यः अस्मान् द्वेष्टि, यं वयं द्विष्मः, 'तच्चक्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतं, जीवेम शरदः शतं, शृणुयाम शरदः शतं, प्रब्रवाम शरदः शतम्, अदीनाः शरदः शतं, भूयश्च शरदः शतात् ।' (२३/३६) ।

अनेन प्रकारेण अत्र अवलोक्यते चेत् मनुष्यस्य मनसि एताः एषणाः सन्ति शान्त्यध्याये यत् सुखं, शान्तिः, अभयम्, आरोग्यं, मैत्रीदृष्टिः, दीर्घायुः, शतवर्षपर्यन्त-मिन्द्रियशरीरधनमनोबलशक्तिः, शत्रुविनाशः एते मम कल्पनानुसारं भवन्तु । भद्रं भवेत् अभयं भवेत् इत्यस्ति नः कामनाः ।

**निष्कर्षः –**

१. एतान्मन्त्रान् विमृश्य मानवमनसि स्थितान् मनोभावान् ज्ञातुं वयं शक्नुमः । एषा भवति वैदिकमनोविज्ञानदृष्टिः ।

२. 'तन्मे मनः शिवसङ्कल्पमस्तु' इत्यस्ति वैदिकी मनोवैज्ञानिकी दृष्टिः विचारधारा । जलेन शिवाभिषेकवत् आत्मनि शिवे शिवसङ्कल्पजलेन अभिषेकः स्वस्य विश्वस्य प्रेयसे श्रेयसे च भवति ।

Scanned with CamScanner

३. वेदानां स्वत: प्रामाण्यात् सनातनत्वाच्च वेदोक्ता: एषणा: सार्वदिका: भवन्ति । एतासामस्तित्वे न प्रमाणान्तरापेक्षापि ।

त्रिकाण्डविभाजने वेदे विविधैषणानां तत्त्यागानां च स्वरूपं वेदादवगम्यते ।

सन्दर्भग्रन्थाः –

१. मनुस्मृति:
२. तर्कसंग्रह:
३. पातञ्जलयोगदर्शनम्
४. ब्रह्मनित्यकर्मसमुच्चय: (रुद्राष्टाध्यायी), सम्पादक: दुर्गाशङ्करशास्त्री
५. शुक्लयजुर्वेदसंहिता ।

*****

प्राचार्य:
युनिवर्सिटी कॉलेज,
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम् (गुजरातप्रदेश:)

Scanned with CamScanner